ISSN : 2583-2271
Vol. - I, No. 1: 2021

# चार्वाकनये अनुमानादेः प्रमाणत्वखण्डनम्

**जयदेवदिण्डा**

## प्रबन्धसारः

*दृश्यते अनेन इति दर्शनम्, दृशिर्-प्रेक्षणे इति धातोः "कृत्यल्युटो बहुलम्" इत्यनेन ल्युट्-प्रत्यये दर्शनमिति सिद्ध्यति। येन माध्यमेन सम्यज्ज्ञानं भवति तत्प्रत्यक्षानुमानोपमानशब्दादिकं यथार्थानुभवसाधनभूतं दर्शनम्। दर्शनञ्च द्विविधम्– नास्तिकदर्शनम्, आस्तिकदर्शनञ्चेति। नास्तिकदर्शनञ्च त्रिविधं– चार्वाकदर्शनम्, बौद्धदर्शनम्, जैनदर्शनञ्चेति। आस्तिकदर्शनञ्च षड्विधम्– सांख्यदर्शनम्, योगदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, पूर्वमीमांसादर्शनम्, उत्तरमीमांसादर्शनञ्चेति।*

*'नास्तिको वेदनिन्दकः' इत्यनुसारेण वेदवाक्येषु ये न विश्वसन्ति त एव नास्तिकाः। प्रत्यक्षमेव प्रमाणत्वेन ये स्वीकुर्वन्ति ते च चार्वका इत्याख्यया आख्यायन्ते। चारुः लोकसम्मत आपातमनोरमो लोकचित्ताकर्षक इति वाको वाक्यमस्य इति चार्वाकः। 'प्रत्यक्षमेवैकं प्रमाणमिति' चार्वाकदर्शने एकमेव प्रमाणं स्वीक्रियते, तच्च प्रत्यक्षम्। तदुक्तं सर्वसिद्धान्तसङ्ग्रहे–*

*प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टतः।*
*अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते॥ इति।*

*प्रत्यक्षसिद्धं वस्तु एव वर्तते, यतोऽप्रत्यक्षत्वात् किमपि अदृष्टं वस्तु नास्ति। तथा च लोकायतशास्त्रप्रतिपाद्ये प्रमाणस्वरूपे प्रत्यक्षमेव प्रमाणं स्वीक्रियते। एवकारेण प्रमाणान्तराणां प्रत्यक्ष एव अन्तर्भावः। प्रत्यक्षनिबन्धनव्याप्तिमूलकमनुमानम्। तस्मादेव अनुमानस्य पृथक् प्रामाण्यं नास्ति। एवमुपमानमपि न प्रमाणान्तरमिति चार्वाका मन्यन्ते। 'महिष इति पुरुषो मातङ्गीव योषिद्' इत्युपमानात् प्रमाज्ञानासम्भवात्। एवं शब्दोऽपि न प्रमाणं, कस्यापि यथार्थवक्तुरभावात्। चार्वाकनये अर्थापत्तिरपि न प्रमाणम्। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र दिवाभुञ्जानविशिष्टपीनत्वेन रात्रिभोजनस्य कल्पना तु नियमेन भवति, दिवा रात्रौ चाभोजिनोऽप्यामवातादिना पीनत्वदर्शनात्। एवमनुपलब्धिरपि न प्रमाणम्, तत्प्रमेयस्य अभावस्यैव अभावात्। 'भूतले घटो नास्ति' इति प्रत्यक्षं हि केवलभूतलसत्त्वे प्रमाणं, न तु भूतलव्यतिरिक्तभूतलनिष्ठाभावासत्त्वे। एवं चार्वाकनये अनुमानादेः प्रामाण्यनिरासः अल्पीयसा वचसा प्रतिपादितः, विस्तारेण तु प्रबन्धे प्रतिपादयिष्यते।*

## उपोद्धातः

मनुष्यः स्वभावतो मननशीलः प्राणी। मत्वा कर्माणि सीव्यतीति तन्निरुक्तिरपि पूर्वोक्तानुकूला। स हि कोऽहं कस्मादहमित्यादिसमस्याः सततं भावयित्वा "आत्मा वा रे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[1] इति दर्शनबीजम् उद्भावितवान्। आत्मदर्शने एव सर्वाणि दर्शनानि प्रवृत्तानि। आत्मदर्शनं दुःखनिर्वृत्तयेऽपेक्षितं दुःखनिवृत्तिरेव च सर्वैरभीप्सिता।

भारते दर्शनस्योदयो वेदकाल एवाजायत। ऋग्वेदे प्रजापतिपरमेष्ठी जगते मूलतत्त्वं मीमांसमानः प्राप्यते। स हि "आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास"[2] इत्यादिमन्त्रेषु तदेव तत्त्वं विमृशन् परिप्राप्यते। अपरोऽपि संवनन आङ्गिरसो नामर्षिः "सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्"[3] इत्यादिमन्त्रेषु तस्यैव तत्वस्यान्वेषणाय लोकान् प्रेरयन् प्रतिभाति। इमे द्वेऽपि मिलित्वा दर्शनानि अङ्कुरयितुं प्राभवताम्।

## दर्शनशब्दार्थः

दृश्यते परिप्राप्यते अनेन इति दर्शनम्, प्रेक्षणार्थकाद् "दृशिर्-प्रेक्षणे" इति धातोः "कृत्यल्युटो बहुलम्" [पाणिनिसूत्रम्–३।३।११३] इत्यनेन ल्युट्-प्रत्यये दर्शनमिति सिध्यति। येन माध्यमेन सम्यज्ज्ञानं भवति तत्प्रत्यक्षानुमानोपमानशब्दादिकं

---

1. बृहदारण्यकोपनिषत्– २।४।५।

2. नासदीयसूक्तम्– १०।१२९।२।

3. संज्ञानसूक्तम्– १०।१९१।२।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

यथार्थानुभवसाधनभूतं दर्शनम्। उपनिषत्सु सत्यस्य दर्शनाय दृश्-धातोः प्रयोगोऽभूत्। अर्थाज्ज्ञानचक्षुषा यद् आत्मेत्यादि अलौकिकं वस्तु गृह्यते तद् दर्शनम्। दर्शनं च द्विविधम्– नास्तिकदर्शनम्, आस्तिकदर्शनं चेति। 'नास्तिको वेदनिन्दकः'[4] इति स्मृत्यनुसारेण वेदवाक्येषु सर्गापवर्गेषु ये न विश्वसन्ति त एव नास्तिकाः इत्यभिधेयेन लोकेषु जनैः अभिधीयन्ते। नास्तिकदर्शनं च त्रिविधं– चार्वाकदर्शनम्, बौद्धदर्शनम्, जैनदर्शनं चेति। बौद्धानां चत्वारः सम्प्रदायाः प्रसिद्धाः– योगाचारः, माध्यमिकः, सौत्रान्तिकः, वैभाषिकश्चेति। एते षड्विधाः नास्तिकाः लोकेषु प्रसिद्धाः।

"नास्ति वेदोदितो लोक इति येषां मतिः स्थिरा।
नास्तिकास्ते तथास्तीति मतिर्येषान्त आस्तिकाः॥
अवैदिकप्रमाणानां सिद्धान्तानां प्रदर्शकाः।
चार्वाकाद्याः षड्विधास्ते ख्याता लोकेषु नास्तिकाः॥"

**चार्वाकदर्शनम्**

चार्वाकदर्शनं जडवादनाम्ना व्यवह्रियते। यस्य दार्शनिकसिद्धान्तानुसारेण जडभूतस्यैव चरमसत्त्वमभ्युपगम्यते यतश्च चैतन्यं मनो वा समुद्भवति स जडवादो नामेति व्यपदिश्यते। चार्वाकदर्शनमेव भारतीयदर्शनस्य जडवादस्यैको दृष्टान्तो मन्यते। प्रत्यक्षमेव प्रमाणत्वेन ये स्वीकुर्वन्ति ते च चार्वका इत्याख्यया आख्यायन्ते। चारुः सुन्दरः लोकसम्मत आपातमनोरमो लोकचित्ताकर्षको वाको वाक्यमस्य इति बहुव्रीहौ चार्वाकशब्दो निष्पद्यते। अदृष्टार्थापेक्षया हि दृष्टसुखार्थं दृष्टदुःखनिवृत्यर्थं वा प्रवर्तते निसर्गतो जन्तुः। स्वर्गसुखावाप्तये यज्ञादिकर्मणि प्रवर्तमाना विरला एव। तथा नरकदुःखभीत्या पापकर्मणः सकाशान्निवर्तमाना विरला एव प्राणिनो दृश्यन्ते। ततश्च स्वाभाविकप्रवृत्त्यनुसारेण कस्यचिदुक्तिः श्रुता चेत्तामनायासेनैव चारुत्वेन गृह्णाति लोक इति लोकवृत्त्यनुसारिण्या उक्तेश्चारुता सम्पाद्यते। हेमचन्द्रस्य मतानुसारेण "चर्वन्ति भक्षयन्ति तत्त्वतो न मन्यन्ते पुण्यपापादिकं परोक्षजातमिति चार्वाकाः"[5] इति। "नयते चार्वी लोकायते चार्वी बुद्धिः तत्सम्बन्धादाचार्योऽपि चार्वी, स च लोकायते शास्त्रे पदार्थान्नयते"[6] इति वामनजयादित्यवचनात् ज्ञायते यत् चार्वी नाम कश्चिदाचार्यः पदार्थं व्याख्यातवान्। बृहस्पतेः शिष्येण चार्वाकनाम्ना केनचन प्राक्तनर्षिणा एतस्य दर्शनस्य सिद्धान्तः प्रचारितः। तस्माद् दर्शनमिदं चार्वाकनाम्ना प्रसिद्धम्। चारुबृहस्पतिर्देवगुरुस्तस्य वाचमुपदेशम् नुसरतीति चार्वाकः। चार्वाकनाम्ना दैत्येन चैतन्मतस्य प्रचारः सम्पादितः। अत एतत् चार्वाकदर्शनम् इत्यभिधीयते। भौतिकं दर्शनं चार्वाकस्य पारिभाषिकोऽर्थः। आसीच्चार्वाकः कस्यचन जनस्य नाम इत्यपि सम्प्रदाये प्रसिद्धः। स तदनुसारिणश्च जडवादस्य प्रवक्तारो बभूवुः। तेषां सिद्धान्तितं चार्वाकदर्शनस्य नामान्तरं लोकायतम्। लोकायतं वेत्तीति लौकायतिको लोकायतिको वेति सिध्यति।

लोकायतदर्शनं, बार्हस्पत्यदर्शनं, नास्तिकदर्शनम् इत्यादिभिः अभिधानेनापि अभिधीयते चार्वाकदर्शनम्। प्रेयोमार्गस्तु श्रेयोमार्गात् सरलतरः रुचिकरश्च भवत्येव। प्रायेण सर्वप्राणिनस्तावद्–

"यावज्जीवं सुखं जीवेत् नास्ति मृत्योरगोचरः।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥"

इति लोकगाथाम् अरुन्धाना अर्थकामा एव पुरुषार्थं मन्यमानाः पारलौकिकम् अर्थम् अपह्नुवानाः चार्वाकमतम् अनुवर्तमाना एव अनुभूयन्ते। अत एव चार्वाकमतस्य लोकायतम् इति अन्वर्थपरम् अपरं नामधेयम्। अथवा इदमेव दर्शनं लोके बाहुल्येन प्रचरितत्वात् लोकायतदर्शननाम्नापि

4. मनुस्मृतिः– २।११।

5. उणादिसूत्रम्, पृ० ३७।

6. काशिकावृत्तौ– १।३।३६।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

व्यवहृतम्। उपनिषत्पुराणमहाभारत-प्रबोधचन्द्रदयादिषु दर्शनान्तरेषु च बार्हस्पत्यसूत्राणामितस्ततः समुल्लेखाज्ज्ञायते आसीच्चार्वाकदर्शनस्य सूत्रकार आचार्यो बृहस्पतिरिति। बृहस्पतिप्रणीतत्वाद् दर्शनस्यास्य बार्हस्पत्यदर्शनमिति नामान्तरम्। अथवा बृहस्पतिः लोकायतश्चार्वाकः पुरन्दरः कम्बलाश्वरश्चेति दाशर्निकैः बहुभिः भौतिकवादिभिः बार्हस्पत्यैः परिचालितेषु बार्हस्पत्यसूत्रेषु मध्येऽस्य मतस्याधिकः प्रचारः चार्वाकनाम्ना दैत्येन सम्पादितः। अतस्तादृशं नाम सञ्जातम्। परं तु तत्रभवतः कोऽपि स्वतन्त्रो ग्रन्थोऽद्यत्वे प्रायेण नोपलभ्यते। परं तु पतञ्जलिसमये दर्शनेऽस्मिन् ग्रन्थाः प्राप्यन्ते स्म। "न यासयोः" [पाणिनिसूत्रम्– ७।३।४५] इति सूत्रभाष्ये पतञ्जलिना उक्तम्– "वर्णिका भागुरी लोकायतस्य। वर्तिका भागुरी लोकायतस्य।"[7] इति। "वर्णिका व्याख्यानानीत्यर्थः। भागुरी टीकाविशेष"[8] इति तद्भाष्योपरि कैयटः। "लोकायतशास्त्रस्य व्याख्यानरूपो ग्रन्थविशेष इत्यत्र"[9] इति नागेशः उद्योते व्याख्यानानीत्यस्य अर्थं प्रोवाच। तत्काले चार्वाकदर्शनग्रन्थानां प्रचारः आसीत्। परं तु वर्तमाने तु ग्रन्थाः नोपलभ्यन्ते न वा कोऽपि तस्य समर्थको नाम सुसङ्घटितः सम्प्रदायो परिप्राप्यते। भारतीयदर्शनेषु च तस्य मतं पूर्वपक्षरूपेण उद्धृत्य खण्ड्यते इति परामृश्यते। आस्तिकदर्शनकारैरस्य दर्शनस्य तथा निन्दा कृता तथा दर्शनमिदम् अस्तङ्गतम्।

चार्वाकदर्शनस्य मूलं वेदेष्वेव वर्तमानमासीत्– 'न प्रेत्य संज्ञास्ति' मरणात् परतः किमपि नास्ति। 'भस्मीभूतस्य देहस्य पुनरागमनं कुतः' इत्यमेव पूर्वपक्षीयविचारधारा चार्वाकदर्शनस्य मूलम्। एते च चार्वाकाः त्रिविधया भावनया एतेषां तत्त्वं कथयन्ति। ते च वैतण्डिक-स्थूल-सुशिक्षितसंज्ञाभिः प्रसिद्धाः। एतेषां मते जगद् आकस्मिकं चातुर्भौतिकम्, अचेतनस्य भूतचतुष्टयस्य मेलनाच्चैतन्यमुत्पद्यते। 'पृथिव्यप्तेजोवायुरिति तत्त्वानि। तत्समुदाये शरीरेन्द्रियविषयसंज्ञा'[10] इति बार्हस्पत्य-सूत्रम्। विनष्टेषु सत्सु स्वयं विनश्यति। तदाहुः "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, स न प्रेत्य संज्ञास्ति"[11] इति। तच्चैतन्यविशिष्टो देह एव आत्मा, देहातिरिक्ते प्रमाणाभावात्। अङ्गनालिङ्गनादि-जन्यं सुखमेव पुरुषार्थः। न चास्य 'दुःखसंभिन्नतया पुरुषार्थत्वम् एव नास्ति' इति मन्तव्यम्। न हि मृगाः सन्ति इति शालयो नोप्यन्ते, न हि भिक्षुकाः सन्ति स्थाल्यो नाधिश्रीयन्ते। ऐहिकं दैहिकं क्षणिकसुखमेव स्वर्गः कण्टकादिव्यथाजनितं दुःखमेव नरकम्। देहोच्छेदः मोक्षः। लोकसिद्धो राजा परमेश्वरः। देहात्मवादे च स्थूलोऽहं, कृशोऽहं, कृष्णोऽहम् इत्यादि सामानाधिकरण्योत्पत्तिः। एतानि च श्रीधरी-नीलकण्ठीप्रभृतिटीकासु उपलभ्यन्ते। तथा च– 'अथ लोकायतम्।' 'पृथिव्यप्तेजोवायुरिति तत्त्वानि।' 'तत्समुदाये शरीरेन्द्रियविष्य-संज्ञा।' 'तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवद् विज्ञानम्।' 'चैतन्यविशिष्टः कायः पुरुषः।' 'काम एवैकः पुरुषार्थः।' 'मरणेवापवर्गः।' इति। कामापराख्यं सुखमेव जीवनस्य चरमलक्ष्यत्वेन अङ्गीकुर्वद् दर्शनमिदं सुखवादीति नाम्ना कथ्यते, वेदविरोधितया नास्तिकं तथा ईश्वरस्य दार्शनिकतत्त्वेन अस्वीकारात् अनीश्वरवादि चेति व्यपदिश्यते।

## प्रत्यक्षमेवैकं प्रमाणम्

'प्रत्यक्षमेवैकं प्रमाणमि'ति चार्वाकदर्शने एकमेव प्रमाणं स्वीक्रियते, तच्च प्रत्यक्षम्। तदुक्तं सर्वसिद्धान्तसङ्ग्रहे–

"प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टतः।

[7]. महाभाष्यम्, षष्ठं खण्डम्, पृ० २०२-२०३।

[8]. तत्रैव, प्रदीपः।

[9]. तत्रैव, उद्योतः।

[10]. बार्हस्पत्यसूत्रम्– ३१।

[11]. बृहदारण्यकोपनिषत्– २।०४।१२।

अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते॥"
इति।

प्रत्यक्षसिद्धं वस्तु एव वर्तते, यतोऽप्रत्यक्षत्वात् किमपि अदृष्टं वस्तु नास्ति। अदृष्टं दृष्टं भवत्यत्यदृष्टवादिनोऽपि न वदन्तीति। तथा च लोकायतशास्त्रप्रतिपाद्ये प्रमाणस्वरूपे प्रत्यक्षमेव प्रमाणं स्वीक्रियते। एवकारः अन्यव्यवच्छेदार्थकः। तेन अनुमानादिप्रमाणानाम् असद्भावत्वम्। प्रत्यक्षं विहाय नेदं दर्शनं दर्शनान्तरमतान्यनुमानशब्दादीनि प्रमाणानि प्रमाणत्वेन मन्यते।

प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकञ्चेति। यदाह अन्नम्भट्टः तर्कसङ्ग्रहे "तद् द्विविधं– निर्विकल्पकं सविकल्पकञ्च। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किञ्चिदिति। सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति"[12] इति। अयं घट इति संज्ञाविशिष्टं पदार्थविषयकं प्रत्यक्षं सविकल्पकम्। यत्र संज्ञादेर्ज्ञानं न भवति केवलं वस्तुनोऽनुभवो भवति तन्निर्विकल्पकं प्रत्यक्षम्। प्रत्यक्षज्ञानस्य करणं प्रत्यक्षं प्रमाणमुच्यते। घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रञ्चेति पञ्चविधं बाह्यं प्रत्यक्षात्मकं ज्ञानं मानसमिति चैकविधमान्तरमिति साकल्येन षड्विधं प्रत्यक्षं शास्त्रेषु मन्यते। किन्तु चार्वाकमते न सर्वं प्रत्यक्षं प्रमाणं, भ्रमज्ञानस्य अभ्युपगमात्।

प्रत्यक्षप्रमाणं सर्वशास्त्रसम्मतम्। प्रत्यक्षमन्तरेण व्याप्तिज्ञानं साध्यसाधनभावो वा न निर्णेतुं शक्यते। प्रत्यक्षं विना उपमानोपमेयभावो न कल्प्यते, सति प्रत्यक्षव्यवहारे च शब्दस्यार्थो बोद्धुं युज्यते। अतः सर्वेषां प्रमाणानां मूलत्वात् प्रत्यक्षं प्रमाणमेव स्वीकर्तव्यम्, अन्यत् सर्वं न प्रमाणम्। भौतिकवादिनां चार्वाकानां मूलसिद्धान्तस्यानुकूलं यद् इन्द्रियगोचरतैव सत्यतायाः प्रयोजकम्। इन्द्रियेण यद् गम्यते बोध्यते ज्ञायते वा तदेव सत्यं प्रामाणिकं स्वीकर्तव्यं विश्वासार्हं च भवति। तस्माद् प्रत्यक्षमेव प्रमाणम्। अनुमानादीनां प्रमाणत्वाभावात् पञ्चभूतेषु प्रथमस्य भूतचतुष्टयस्य सत्ता स्वीक्रियते। आकाशस्य प्रत्यक्षाभावेन प्रत्यक्षैकप्रमाणवादिभिः चार्वाकैर्नाकाशः स्वीक्रयते। आकाशस्य ज्ञानमनुमानेन भवति। चार्वाकनये त्वनुमानस्य प्रामाण्यास्वीकाराद् आकाशस्यास्तित्वं नाङ्गीक्रियते। अनुमानादीनां प्रामाण्यत्वे तु चार्वाकैः आकाशस्यापि सत्ता स्वीक्रियेत।

## अनुमानादीनां प्रमाणत्वनिरासः

चार्वाकभिन्नाः सर्वेऽपि भारतीय-दार्शनिकाः अनुमानं प्रमाणत्वेन स्वीकुर्वन्ति। अनु पश्चान्मानं ज्ञानमित्यनयोः अनुमानशब्दयोः अनुमानमिति निष्पद्यते। प्रत्यक्षनिबन्धनव्याप्तिमूलकमनुमानम्। दृष्टानु-भूतनियममाश्रित्य कस्यचिददृष्टस्य अननुभूतस्य च वस्तुनः सत्ता अनुमीयते। अनुमानं लिङ्गलिङ्गिपूर्वकं भवति। तच्च व्याप्तिज्ञानावलम्बि वर्तते। व्याप्तिश्च रहितसम्बन्धः। 'यत्र धूमस्तत्र तत्राग्निः', इति अनुपाधिकसाहचर्यनिमयो हि व्याप्तिः इत्युच्यते। व्याप्तिसूचकवाक्यस्य सत्यता न प्रमाणसिद्धा अतो नानुमानमपि स्वीकरणार्हम्। 'यत्र धूमस्तत्र तत्राग्निः', 'पर्वतोऽयं धूमवान् तस्मादत्र पर्वतेऽग्निरवश्यमेव' इत्येतां व्याप्तिमवलम्ब्य अनुमानेन पर्वतस्य वह्निमत्त्वं प्रमाणीक्रियते। अनुमानमिदं तदैव स्वीकर्तुं शक्यं यदैव व्याप्तिसूचकवाक्यस्य सत्यता प्रमाणसिद्धा स्यात्। यानि यानि धूमाग्निमन्ति तेषां सर्वेषां स्थानानां निरीक्षणाभावात् प्रत्यक्षस्य सीमितत्वात् वर्तमानमाकाल-वर्तिनामेव धूमाग्निविशिष्टानां स्थानानां प्रेक्षणमपि सिद्धीभवितुं न शक्यं कुतः पुनर्भूतभाविस्थलानाम्। एवं स्थिते व्याप्तिवाक्यस्य सत्यताभावात् नामुमानं प्रमाणम्। वह्निधूमयोः सामान्यलक्षण-

[12]. तर्कसङ्ग्रहः, प्रत्यक्षपरिच्छेदः, पृ० १५७।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

प्रत्यासत्त्या सकलधूमवह्नीनाम् अलौकिक-प्रत्यक्षसम्भवाद् व्याप्तिग्रहः सुलभः इति नैयायिकमतं न युक्तं सामान्यस्यैव चार्वाकमतेऽस्वीकृतत्वात्।
घटादिव्यक्त्यपेक्षया अतिरिक्तं किञ्चिद् घटत्वादिकं न प्रत्यक्षीक्रियते येन सामान्यकल्पना अर्थवती स्यात्। घटोऽयमिति प्रत्यक्षं तु घटसद्भावे प्रमाणं न तु घटगतसामान्यसद्भावे। अन्यथा आकाशस्य सत्ता स्वीकार्या स्यात्। प्रत्यक्षैकवादिनश्चार्वाकस्य मते त्वाकाशो न स्वीक्रियते। आकाशस्वीकारे तु अनुमानप्रमाणस्यापि स्वीकारापत्तिः। किञ्च जलशून्ये तप्ते लौहपिण्डे केवलाग्निवद् गोपालघुटिकादौ केवलधूमस्यापि प्रत्यक्षकृतेन भूयोदर्शनेन व्यभिचारनिरासासम्भवः एव। अत उपाधिरूपव्यभिचाररहितः कश्चित् सम्बन्धो व्याप्तिनामा न सम्भवति। अतो निर्दोषमसन्दिग्धं व्याप्तिज्ञानं न सम्भवति। एवञ्च व्याप्तिग्रहासम्भवाद् अनुमानं न प्रमाणम्।

अनुमानं लोकव्यवहारसाध्यमित्यपि चार्वाकैः न स्वीक्रियते। लोकव्यवहारेऽपि अनुमानम् अनपेक्षितं सम्भावनयैव लोकव्यवहारस्य गतार्थत्वात्। सम्भावनावशादेव मानवः तत्तत्कर्मणि प्रवर्तते। किञ्च अनुमानवादिनां धूमानलयोः कार्यकारणभावात् तत्साहचर्यस्यापि न्यायसङ्गतत्वात् इत्येतत्कथमपि चार्वाकैर्न स्वीक्रियते कार्यकारणभावस्य असत्त्वात्। स्वभावादेव संसारगतविचित्रता न तु कार्यकारणभावजनिता। मनुष्यस्य सुखसत्त्वे हेतुर्धर्मः किञ्च दुःखसत्त्वे कारणमधर्मः इत्यपि न वक्तव्यम्। मनुष्यः स्वभावादेव सुखं दुःखञ्च भजते इति चार्वाकाः। अग्नेः दाहकत्वं जलस्य शीतलत्वं तु पदार्थस्य स्वभाव एव। एवं चार्वाकाः कार्यकारणभावं निरस्यन्तः स्वभाववादं प्रतिष्ठापयन्ति। जगत उत्पत्तौ विनाशे च प्रधानं कारणं स्वभावमेव।

एवमुपमानमपि न प्रमाणान्तरमिति चार्वाका मन्यन्ते। 'महिष इति पुरुषो मातङ्गीव योषिद्' इत्युपमानात् प्रमाज्ञानासम्भवात्। तथा च गोसदृशपिण्डे संज्ञिनि गवय इति संज्ञायाः यः शक्तिरूपसम्बन्धः स उपमानप्रमाणेन ज्ञायते न तु तादृशसम्बन्धविशेषातिरिक्तं किञ्चिदस्ति। गोसदृशो गवय इति वृद्धवचनन्तु शब्दप्रमाणम्। वने गवयगवाकृतादर्शनं प्रत्यक्षमेव। गोसादृश्यहेतुना तादृशप्राणिनि गवयबोधोऽनुमाने चान्तर्भुक्तः। चार्वकमते अनुमाशब्दाभ्यां व्याप्तिग्रहे या आपत्तिः सैवोपमानेऽपि सङ्घटते। अतो नास्ति उपमानप्रमाणस्य सद्भावत्वम्।

एवं शब्दोऽपि न प्रमाणं कस्यापि यथार्थवक्तुरभावात्। तथा च बालो हि 'गामानय' इत्यादिशब्दस्य गवानयनाद्यर्थ-बोधकत्वम् अवबुध्यते। ततश्च 'गां बधान', 'अश्वमानय' इत्यादिप्रयोगान्तरेषु पदान्तरयोगत्यागरूपौ आवापोद्वापौ दृष्ट्वा गोशब्दः सास्नादिमतो वाचकः, आनयशब्दः आनयनक्रियावाचकः इत्यादिपदार्थविवेकम् अवधारयति। एवं वृद्धव्यवहारेण ज्ञातशब्दार्थो ज्ञायते। वृद्धव्यवहारात् शब्दार्थस्य अनुमानं भवतीति वैशेषिकाः। चार्वाकस्तु अनुमानं व्याप्तिज्ञानस्योपाय इत्युक्तौ यो दोषः आपपति सोऽयं व्याप्तिज्ञानस्योपायः शब्दः इत्यपि बोध्यम्। अतश्चार्वाकः शब्दं न प्रमाणत्वेन स्वीकुर्वन्ति।

किञ्च आप्तवचनस्य स्वीकारादपि आप्तवचनस्य आकर्णाद् योऽर्थबोधो जायते स तु प्रत्यक्षप्रमाणेनैव सिध्यति। किञ्च कस्यापि पुरुषस्याप्तत्वात् प्रामाणिकत्वात् सत्यवचनत्वात् हितेच्छुत्वाच्च तस्य वचसि आस्थायाः संस्थापनमनुमानमेव। अनुमानञ्चानुपदमेव प्रत्याख्यातमत आप्तपुरुषोक्तवाक्ये सत्यधियः प्रतिष्ठापनम् एकान्ततो निस्सारम्। जगद्विषयकप्रत्यक्ष-पदार्थानां वर्णनन्तु तत्कृतं विश्वासार्हं परमदृष्टस्य लोकस्याश्रुतपूर्वपदार्थानां

आप्तकृतवर्णनन्तु मनोरञ्जनान्नाधिकं किमपि इत्येतद्विचारं प्रकाशयन्तश्चार्वाकाः वेदानामपि प्रामाण्यं निराकुर्वन्ति। विरोधिवचःप्रकाशन-कारित्वात् निरर्थकशब्द-प्रयोगकारित्वात् अप्रत्यक्षपदार्थविषयक-कल्पनाकारित्वाच्च वेदाः न प्रमाणम्। वेदाः यज्ञेषु घृणितानि कर्माणि अनुष्ठातुमुपदिशन्ति, मांसभक्षणञ्च यागेषु विधित्वेन प्रतिपादयन्ति अतः वेदाः न मान्याः। वेदानां कर्तारश्च सन्ति धूर्ता भण्डा निशाचराश्च–

"त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः।
जर्फरीतुर्फरीत्यादिपण्डितानां वचः स्मृतम्॥"

एवं चार्वाकाः शब्दप्रमाणं खण्डयन्तो वेदस्य प्रामाण्यमपि निराकुर्वन्ति। चार्वाकाः न सन्ति शब्दप्रमाणवादिनस्तस्मात्ते ईश्वरप्रतिपादिकाः श्रुतीरपि नाद्रियन्ते। शब्दाधारे हि ईश्वरस्यास्तित्वस्वीकरणं न तेषामभितम्। ते अनुमानप्रमाणमपि नाङ्गीकुर्वन्ति। अतोऽनुमानेन नैयायिकाः यस्येश्वरस्य सत्तामुद्घोषयन्ति स ईश्वरोऽपि चार्वाकैः प्रतिषिध्यते। ईश्वरस्य सत्ताभावात् कथं जगदुत्पत्तिश्चेत् स्वभावादेव जगदुत्पत्तिः किञ्च स्वभावादेव तल्लयः। तस्मात् तदुत्पत्तौ तल्लीनतायाञ्च ईश्वरस्य सत्तास्वीकारो नापेक्ष्यते।

चार्वाकनये अर्थापत्तिरपि न प्रमाणम्। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र दिवाभुञ्जानविशिष्टपीनत्वेन रात्रिभोजनस्य कल्पना तु नियमेन भवति, दिवा रात्रौ चाभोजिनोऽप्यामवातादिना पीनत्वदर्शनात्।

एवमनुपलब्धिरपि न प्रमाणम्, तत्प्रमेयस्य अभावस्यैव अभावात्। 'भूतले घटो नास्ति' इति प्रत्यक्षं हि केवलभूतलसत्त्वे प्रमाणं, न तु भूतलव्यतिरिक्तभूतल-निष्ठाभावासत्त्वे। एवम् अभावोऽपि न प्रमाणम्।

## उपसंहृतिः

नन्वस्तु अनुमानादीनां प्रामाण्याभावः। परन्तु प्रेक्षावन्तो हि पर्वतादौ धूमं दृष्ट्वा अग्निरस्तीत्यनुमानप्रमाणेन निश्चित्याग्निप्राप्त्यर्थं प्रवर्त्तमाना लोक उपलभ्यते। तथा यथार्थवक्त्रा केनचिन्नद्यास्तीरे फलानि सन्तीत्युक्ते शब्दप्रमाणेन नद्यास्तीरे फलानि सन्तीति निश्चित्य फलप्राप्त्यर्थं प्रेक्षावतां फलार्थिनां तत्र प्रवृत्तिर्दृश्यते। प्रत्यक्षैकप्रमाणवादिनां चार्वाकाणां नये त्वनुमानस्य शब्दस्य च प्रामाण्याभावेन लोके दृश्यमाना प्रेक्षावतां प्रवृत्तिर्नोपपद्यते। अत्रोच्यते धूमादिज्ञानानन्त-रमग्न्यादिज्ञाने प्रवृत्तिः प्रत्यक्षमूलतया सम्भावना भ्रान्त्या वा युज्यते। तथा च पूर्वं प्रत्यक्षतो दृष्टोऽग्निः, पश्चात् कियद्भिः क्षणैर्धूमं दृष्ट्वोद्बुद्धसंस्कारोऽग्निं स्मृत्वाग्नौ प्रवर्तते। अथवा धूमाग्न्योः साहचर्येण धूमं दृष्ट्वाग्निभ्रमात्तत्र प्रवृत्तिर्भवति, भ्रान्त्या प्रवृत्तौ सत्यस्याग्नेर्यः प्रतिलम्भो भवति स च काकतालीयन्यायेन मणिमन्त्रौषधादिवद् दादृच्छिकः। कार्यकारणभावमस्वीकुर्वतां चार्वाकाणां मते धूमाग्निज्ञानयोः कार्यकारणभावो न सम्भवति। तत्र भ्रान्त्या प्रवृत्तावपि यादृच्छिकतयैव वस्तुसतोऽग्नेः प्रतिलम्भो भवति। अतो नास्त्यनुमानादेः प्रामाण्यमिति। एवं यथामति अल्पीयसा वचसा चार्वाकनये अनुमानादीनां प्रामाण्याभावः विचारितः।

### सहायकग्रन्थाः


- माधवः। २००४। *सर्वदर्शनसंग्रहः (प्रकाशव्याख्योपेतः)*। शर्मा, उमाशङ्करः (सम्पा.)। वाराणसी : चौखम्बाविद्याभवनम्।
- श्रीमदन्नम्भट्टः। २०१७। *तर्कसंग्रहः (दीपिका-न्यायबोधनी-पदकृत्य-श्रीनिवासमुखोल्लासिनी-श्रीधरमुखोल्लासिनीहिन्दीव्याख्योपेतः)*। गोविन्दाचार्यः (सम्पा०)। वाराणसी : चौखम्बा-विद्याभवनम्।
- गौडः, शशिबाला। २०१२। *दर्शनशास्त्रस्येतिहासः*। गौडः, ज्वालाप्रसादः (सम्पा०)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- शुक्लः, रमेशचन्द्रः। २०१२। *प्रबन्धरत्नाकरः*। वाराणसी : चौखम्बा-विद्याभवनम्।
- साहा, विश्वरूपः। २००५। *नास्तिकदर्शनपरिचयः*। कलिकाता : सदेशः।
- मिश्रः, जगदीशः। २०१६। *भारतीय दर्शन (हिन्दीग्रन्थः)*। वाराणसी : चौखम्बासुरभारती-प्रकाशनम्।
- सेनः, देवव्रतः। २०१४। भारतीय दर्शन (वङ्गभाषीयो